© 2018 IJSRST | Volume 4 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Engineering and Technology
doi : 10.32628/IJSRST

# Critical study of Anthakarana as Illustrated in vedantha in the reference of Yoga and Ayurveda

# वेदान्तशास्त्रोक्तरीत्या अन्तःकरणनिरूपणं, योगायुर्वेदशास्त्ररीत्या तद्विमर्शश्च

Prajwal J
Department of Advitha Vedantha, Rashtriya Sanskrit Sansthan

**सारांशः–** "मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥"

इति श्रुतेः विषयासक्तमन्तःकरणं स्वरूपज्ञाने बाधकं सत् जीवं संसारचक्रे भ्रमयति। ब्रह्ममात्रविषयकमन्तःकरणं तु मुक्तिसाधकं भवति। तस्मात् मोक्षशास्त्रेऽपि वेदान्ते अन्तःकरणविचारः अवश्यं करणीयः। अतः अस्मिन् शोधप्रबन्धे अन्तःकरणस्य स्वरूपविषये अद्वैतमतं प्राधान्येन प्रस्तूय, तस्मिन् विषये योगायुर्वेदशास्त्रयोः मते साम्यवैषम्यविषयाः प्रस्तूयन्ते।

प्रमुखाः शब्दाः – मनः, चित्तम्, बुद्धिः, अहङ्कारः, मोक्षः, इन्द्रियम्, अन्तःकरणम्, जीवः, ब्रह्म, समाधिः, निग्रहः, उपनिषत्, योगः, आयुर्वेदः, वेदान्तः।

## वेदान्तशास्त्रे विविधशब्दैः अन्तःकरणस्य निर्देशः

अन्तः मध्यवर्ति करणं ज्ञानसाधनम् इति अन्तःकरणम्[1]। बाह्यविषयाणां ज्ञानार्थं साधकं भवति अन्तःकरणम्। मध्यवर्ति च जीवविषययोः। वेदान्तग्रन्थेषु विविधैः शब्दैः अन्तःकरणस्य निर्देशः कृतः। कुत्रचित् मनः व्यपदेशः दृश्यते। तद्यथा उपनिषत्सु "अनेजदेकं मनसः जवीयः"[2], "केनेषितं पतति प्रेषितं मनः"[3], "मनसैवेदमाप्तव्यम्"[4] इत्यादिरूपेण। गीतायां च "इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः"[5], "इन्द्रियाणां च चरतां यन्मनोनुविधीयते"[6], "कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्"[7], "मनः षष्ठानीन्द्रियाणि"[8] इत्येवमादिषु। आचार्याश्च ईशावास्यभाष्ये "मनसः अन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्य"[9] इति स्पष्टं मनसः अन्तःकरणशब्दव्यपदेशं दर्शयन्ति। कुत्रचित् बुद्धिशब्देन अपि अन्तःकरणस्य व्यपदेशः कृतः। यथा – "अन्तःकरणं बुद्धिः तस्मिन् समाधौ"[10], "कार्याकार्यविषयविवेकायोग्यता अन्तःकरणस्य बुद्धेः नाशः"[11] इत्यादिषु। कुत्रचित् आत्मा इति

---

1. शब्दकल्पद्रुमः 1/53
2. ईश.उ.4
3. केन.उ.1/1
4. कठ.उ.2/1/11
5. भ.गी.2/6
6. भ.गी.2/67
7. भ.गी.3/6
8. भ.गी.15/7
9. ईश.भा.4
10. गी.भा.2/44

Received : 10 May 2018 | Accepted : 25 May 2018 | May-June-2018 [ 4 (8) : 993-1003]

पदेनापि अन्तःकरणं व्यपदिशष्टम्। यथा – “विधेयात्मा इच्छातो विधेयः आत्मा अन्तःकरणं यस्य सः”[12], “संशयात्मनः संशयचित्तस्य”[13] इत्येवमादिषु। योगशब्देनापि अन्तःकरणं निर्दिष्टं क्वचित्।उक्तञ्च – “अयुक्तस्य असमाहित–अन्तःकरणस्य”[14] इति। कुत्रचित् चित्तशब्देनापि व्यपदेशः अन्तःकरणस्य दृष्टः। यथा “मनः संयम्य मच्चित्तः युक्तः आसीत मत्परः”[15], “यतचित्तस्य संयतान्तःकरणस्य”[16] इत्यादिषु। प्राणशब्देन अपि अन्तःकरणस्य व्यपदेशः दृष्टः क्वचित्। यथा “एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति”[17] इत्यादिषु।

## योगायुर्वेदशास्त्रेषु अन्तःकरणस्य निर्देशः

योगसूत्रेषु अन्तःकरणम् आधिक्येन चित्तपदेन व्यपदिश्यते। यथा “योगः चित्तवृत्तिनिरोधः”, “चित्तस्य अन्तःकरणस्य”, “वीतरागविषयवं वा चित्तम्”[18] इत्यादिषु। योगः चित्तवृत्तिनिरोधः इति सूत्रस्य व्याख्यातारः “चित्तस्य अन्तःकरणस्य”[19] इति चित्तमन्तःकरणापरपर्यायत्वेन व्याख्यानं कुर्वन्ति। क्वचित् मनश्शब्दः अपि प्रयुक्तः। यथा –“सत्त्वशुद्धिसौमनस्य–एकाग्रतेन्द्रियजयात्मदर्शनयोग्यत्वानि च”, “धारणासु योग्यता मनसः” [20] इत्यादिषु। साङ्ख्यमतानुलम्बित्वात् योगिनां महदहङ्कारमनसां मिलित्वा चित्तशब्दप्रयोगः इति ज्ञातव्यः। साङ्ख्यकारिकायामपि महदहङ्कारमनसामन्तःकरणशब्दव्यपदेशः दृष्टः – “अन्तःकरणं त्रिविधम्”[21] इति। “अन्तःकरणमिति– बुद्ध्यहङ्कारमनांसि, त्रिविधं महदादिभेदात्” इति गौडापादाः। आयुर्वेदशास्त्रे अपि चित्तं, मनः इत्यादिशब्दैः अन्तःकरणस्य निर्देशः दृष्टः, यथा “प्रसन्नचित्तवाक्चेष्टमिति क्लेशसहञ्च भिषक् शिष्यमुपनयेत्”[22] “लक्षणं मनसो ज्ञानम्”[23] इत्यादिषु।

## अन्तःकरणस्य उत्पत्तिः सत्त्वगुणप्राधान्यञ्च

**“एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च।**

**खं वायुः ज्योतिरापः पृथिवी विश्वस्य धारिणी॥ ”[24]**

इत्यादिश्रुत्या परमात्मनः सकाशादेव मनःशब्दवाच्यान्तःकरणस्य उत्पत्तिः प्रतिपादिता वेदान्तशास्त्रे। मायोपाधिकब्रह्मणः सकाशात् आकाशादीनां पञ्चनां सूक्ष्मभूतानां सृष्ट्यनन्तरम् अन्तःकरणस्य सृष्टिः भवति। अकाशादीनि सूक्ष्मभूतानि त्रिगुणात्मकमायाकार्याणि सत्त्वरजस्तमोगुणात्मकानि। तानि पञ्चापि सूक्ष्मभूतानि सत्त्वगुणप्रधानानि मिलितानि अन्तःकरणम् उत्पादयन्ति। उक्तञ्च – "एतेभ्यः पुनः आकाशादिगतसात्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहङ्कारचित्तानि जायन्ते”[25] इति। तत्र

---

11. गी.भा.2/63
12. गी.भा.2/64
13. गी.भा.4/40
14. गी.भा.2/66
15. भ.गी.6/14
16. गी.भा.6/19
17. बृ.उ.2/1/20
18. यो.सू.1/2, 1/37.
19. भावगणेशवृत्तिः, नागोजिभट्टवृत्तिः– (यो.सू.) 1/1
20. यो.सू.2/41, यो.सू.2/53
21. साङ्ख्य.का.33
22. सुश्रुत.सूत्र.1/2
23. चरक.शारीर.1/19.
24. मुं.उ.2/1/2
25. वे.परि.विषय.पृ 337

मिलितेभ्यः सूक्ष्मभूतेभ्यः उत्पन्नम् अन्तःकरणम् इत्यत्र "अन्नमयं हि सोम्य मनः"[26] इति श्रुतिरपि प्रमाणं भवितिे। अन्नमिति अत्र पृथिवीतत्त्वम् उच्यते। उक्तञ्च आचार्यैः – "ताः अन्नमसृजन्तेति पृथिवी उक्ता"[27] इति। पृथिव्यां च शब्दस्पर्शरूपरसगन्धानां सर्वेषां तन्मात्राणाम् अन्तर्भावः सृष्टिक्रमे प्रतिपादितः। अतः पृथिव्याः मनः उत्पन्नमित्यस्य सर्वेभ्यः तन्मात्रेभ्यः मिलितेभ्यः एव उत्पन्नमिति सिद्धं भवति। किञ्च श्रोत्रेन्द्रियं शब्दगुणकं शब्दतन्मात्रात् आकाशात् सूक्ष्मभूतादुत्पद्यते। एवं क्रमेण वाय्वादीनि पृथिव्यन्तानि भूतानि शब्दस्पर्शरूपरसगन्धेषु उत्तरोत्तरगुणसम्मिलितानि तेभ्यः तेभ्यः तन्मातृसचिवेभ्यः उत्पद्यन्ते। मनस्तु सर्वेन्द्रियाध्यक्षमतः मिलितेभ्यः एव सर्वेभ्यः तन्मात्रेभ्यः उत्पद्यते इत्येव वक्तव्यं भवति। अन्तःकरणस्य सत्त्वगुणप्राधान्ये अपि इदमनुमानं कर्तुं शक्यते – सत्त्वगुणस्य प्रकाशकत्वं शास्त्रेषु स्पष्टम् ।उक्तञ्च “तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनायम्”[28] इति। अन्तःकरणञ्च बाह्यान् घटपटादीन्, आन्तरान् सुखदुःखादीन् च प्रकाशयति इति प्रकाशकमन्तःकरणं सत्त्वगुणप्रधानमेव भवेत्। अपि च घटपटादीनां प्रत्यक्षत्वे अन्तःकरणस्य वृत्तिरूपेण चक्षुरादिभ्यः बहिः शीघ्रनिर्गमनपि तस्य सत्त्वगुणप्राधान्येन तैजसत्त्वे एव सिध्यति। उक्तञ्च – “तैजसम् अन्तःकरणञ्चक्षुरादिद्वारा निर्गत्य”[29], “तैजसमन्तःकरणं स्वच्छद्रव्यत्वात्”[30] इति। किञ्च तत्र सत्त्वगुणप्राधान्ये अपि त्रिगुणमायाकार्यत्वात् रजस्तमसोरपि सद्भावः स्मरणीयः। एवमन्तःकरणं सत्त्वांशप्रधानैः वियदादिभिः ईश्वराधिष्ठितैः मिलितैः उत्पन्नमिति अद्वैतमतम्।

योगपक्षस्य सृष्टिक्रमः प्राक् प्रतिपदादितः। ईश्वरानुग्रहात् गुणत्रयसाम्यावस्थायाः प्रकृतेः परुषसंयुक्तायाः महत् बुद्धितत्त्वम् उत्पद्यते। ततः त्रिगुणात्मकः अहङ्कारः उत्पद्यते। ततः सत्त्व–रजोभयगुणप्रधानादहङ्कारात् मनः उत्पद्यते।उक्तञ्च – “अहङ्कारः सत्त्वेन रजसा उभयेन ज्ञानकर्मेन्द्रियमनसां प्रकृतिः”[31] इति। एवं मूलप्रकृतेः महतः, ततः अहङ्कारस्य, ततश्च मनसः उत्पत्तिः इति अन्तःकरणान्तर्गतेषु एव अंशेषु कार्यकारणभावः योगशास्त्रज्ञैः प्रदर्शितः। किन्तु महदहङ्कारमनासां पृथक् तत्त्वोपदेशः अप्रामाणिकः। योगशास्त्रज्ञैः प्रतिपादितरीत्या महान् अहङ्कारः इति वा पृथक् तत्वं न लोके वेदे च प्रसिद्धम्।

**“इन्द्रियेभ्यः परा ह्यर्था: अर्थेभ्यश्च परं मनः।**
**मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः॥**
**महतः परमव्यक्तमव्यक्तात् पुरुषः परः।**
**पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥”**[32]

इत्यादिषु उपनिषन्मन्त्रेषु मनसः महतश्च पृथगुपदेशः योगमते प्रमाणमित्यपि न वक्तव्यम्। तेषु निर्दिष्टं महत्पदं भोक्तारं जीवं निर्दिशति, न बुद्धितत्त्वमिति “आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च”[33] इति सूत्रभाष्ये निर्णयः कृतः। दर्शितञ्च तत्र –

**“आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च॥**
**इन्द्रियाणि हयानाहुः विषयान् तेषु गोचरान्।**

26. छां.उ.6/5/4
27. छां.भा.6/2/4
28. भ.गी.14/6
29. वे.परि प्रत्यक्ष.पृ 38
30. वे.परि.विषय.पृ 366
31. मणिप्रभा (यो.सू.) 2/19
32. कठ.उ.1/3/10, 11
33. ब्र.सू.1/4/1

**आत्मेन्द्रियमनोयुक्तान् भोक्तेत्याहुर्मनीषिणः॥ "[34]**

इति रथरूपकल्पनायां प्रकृताः एव विषयाः "इन्द्रियेभ्यः पराः..." इत्यत्र स्वीकृताः। योगशास्त्रविदः बुद्धितत्त्वमेव महदिति वदन्ति। किन्तु मन्त्रे महतः बुद्धेः पृथगुपदेशः दृष्टः। अतः रथित्वेन कल्पितः भोक्ता एव अत्र महान् इति शब्देन व्यपदिश्यते। इन्द्रियादीनां स्वामित्वात् तस्य महत्त्वमपि सिध्यति। उक्तञ्च – "बुद्धेरात्मा महान् परः, यः स आत्मानं रथिनं विद्धि इति रथित्वेन उपक्षिप्तः। कुतः। आत्मशब्दात्। भोक्तुश्च भोगोपकरणात् परत्वोपपत्तेः। महत्वं च अस्य स्वामित्वादुपपन्नम्"[35] इति। मनसः बुद्धेः च एकस्य एव अन्तःकरणस्य भेदे सत्यपि परत्वव्यवहारः तयोः भेदं दर्शयति इति न वाच्यम्। स्पष्टयति आचार्यः शङ्करः – "विषयेभ्यश्च मनसः परत्वं, मनोमूलत्वाद्विषयेन्द्रिव्यवहारस्य। मनसस्तु परा बुद्धिः। बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति"[36] इति। अथवा हिरण्यगर्भस्य प्रथमजस्य बुद्धिः अत्र महान् इति शब्देन व्यपदिश्यते। उक्तञ्च – "प्रथमजस्य बुद्धिः सा सर्वासां बुद्धीनां  परा प्रतिष्ठा। सेह महानात्मा इत्युच्यते"[37] इति। अध्वरीन्द्राः वेदान्तपरिभाषायां हिरण्यगर्भलिङ्गशरीरं महत्, अस्मदादीनां जीवीनां लिङ्गशरीरम् अहङ्कार उच्यते इति निरूपयन्ति। तथा च प्रतिपादितं तत्र – "तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्वम्, अस्मदादिलिङ्गशरीरम् अहङ्कार इत्याख्यायते"[38] इति। किञ्च– "अन्नमशितं त्रेधा विधीयते" इत्युक्त्वा "योणिष्ठः तन्मनः" ,"अन्नमयं हि सोम्य मनः"[39] इति श्रुतिः अन्तःकरणस्य भौतिकत्वं प्रतिपादयति। अपि च "इतरेषां चानुपलब्धेः" [40] इति बादरायणः महदहङ्कारयोः पृथक्तत्वत्वे वेद–लोकप्रसिद्ध्यभावं प्रदर्शयति। तस्मात् योगिनां महदहङ्कारमनसां पृथक्तत्त्वत्त्वोपदेशः, अन्तःकरणस्य अभौतिकत्वप्रतिपादनञ्च  श्रुतिन्याय–विरुद्धमित्यतः श्रुतिपातिपाद्यं सूक्ष्मभूतेभ्यः अवच्छिन्नं चैतन्यमन्तःकरणं सृजति इति वेदान्तमतमेव प्रामाणिकम्।

आयुर्वेदिनां सृष्टिक्रमे मतभेदः प्रथमे अध्याये दर्शितः। तत्र चरके – प्रधानात् महतः, ततः अहङ्कारस्य उत्पत्तिः भवति। ततः सत्त्वगुणप्रधानात् अहङ्कारात् वैकृताभिधानात् मनः उत्पद्यते। इत्येवं महदहङ्कारमनोऽन्तर्गतस्य अन्तःकरणस्य उत्पत्तिः साङ्ख्यीयक्रमे प्रदर्शितः[41]। किन्तु तत्रैव चरके पुरुषस्य सर्वकर्तृत्वमपि प्रतिपादितम्[42], यच्च साङ्ख्यमतविरुद्धम्। । तेन चरके मायाशबलः पुरुषः एव अन्तःकरणस्य कर्ता इति प्रतिपादितं भवति। अतः यद्यपि अन्तःकरणस्य उत्पत्तिक्रमे चरकोऽक्तिः वेदान्तमतं विरुध्यते, तथापि मयावच्छिन्नस्य चैतन्यस्य अन्तःकरणकतृत्वे तु साम्यं लक्ष्यते। किञ्च साङ्ख्यसम्मतां सृष्टिं वदन्ती बुद्धिमनसोः कार्यकारणभावं प्रतिपादयन्ती चरकसंहिता – "विचार्यम् ...सङ्कल्पमेव च"[43] इति मनः हेयोपादेयतया निश्चिनुते इति मनसि एव बुद्धिकार्यं निरूपयति। इत्येवमेकस्मिन्नेव ग्रन्थे महदङ्कारमनसां पृथक्त्वे वैमत्यं

---

34. कठ.उ.1/3/3,4
35. सू.भा.1/4/1
36. सू.भा.1/4/1
37. सू.भा.1/4/1
38. वे.परि.विषय.पृ 349
39. छां.उ.6/5/1,4
40. ब्र.सू.2/1/2
41. "तस्मदव्यक्तात् महानुत्पद्यते तल्लिङ्ग एव च। तल्लिङ्गाच्च महतः तल्लिङ्ग एव अहङ्कारः उत्पद्यते। स त्रिविधो वैकारिकस्तेजसो भूतादिरिति। तत्र वैकारिकाहङ्कारात् तैजससहायात् तल्लक्षणान्येकादशेन्द्रियाणि उत्पद्यन्ते। तद्यथा – श्रोत्रत्वक्चक्षुर्जिह्वाघस्तोपस्थपायुपादमनांसि इति। तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि पञ्च कर्मेन्द्रियाणि उभयात्मकं मनः" – सुश्रुत.शारीर.1/4
42. चरक.शारीर.1/43
43. चरक.शारीर.20

दृश्यते। शाङ्र्गधरसंहितायामपि सांख्यीयः उत्पत्तिक्रमः निर्दिष्टः। किन्तु तत्रापि मूलप्रकृतिः परब्रह्मणि आश्रिता इति वेदान्तमतमपि प्रतिपादितम्। तथा च उक्तं –

**"प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा।**

**एतानि तस्या नामानि शिवमाश्रित्य या स्थिता।।** "[44] इति।

सुश्रुते तु साङ्ख्यसृष्टिवादः प्रस्तुत्य निराकृतः। प्रसिद्धाः अन्येऽपि सृष्टिवादाः निरूप्य निराकृताः। ईश्वरसृष्टिरपि सुश्रुते प्रत्याख्यायते[45]। किन्तु भूतेभ्यः एव सृष्टिरिति वादः प्रदश्र्यते।उक्तञ्च –"भौतिकान्येव इन्द्रियाणि आयुर्वेदे वण्र्यन्ते तथेन्द्रियार्थाः"[46] इति। अन्तःकरणस्य भौतिकत्वांशेन तु सुश्रुतमतं वेदान्तसम्मतं लक्ष्यते। किन्तु ईश्वरनिराकरणादिकं तु वेदबाह्यत्वात् अश्रद्धेयम्। अतः पञ्चतन्मात्रशरीरः परमात्मा अन्तःकरणं सृजति इति श्रुतिमतमेव साधु।

**अन्तःकरणस्य इन्द्रियत्वम्**

वेदान्तमते अन्तःकरणस्य इन्द्रियत्वमङ्गीक्रियते। उक्तञ्च– "इन्द्रियाणां मनश्चास्मि"[47] इति। तत्रैव "एकादशानां चक्षुरादीनां मनश्चास्मि" इति आचार्यभाष्यम्। अपि च "मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति"[48] इति वदता भगवता इन्द्रियत्वेन मनसः स्वीकारः कृतः। किञ्च "अधिष्ठाय मनश्चायं विषयानुपसेवते"[49] इति श्लोकभाष्ये आचार्याः "मनश्च षष्ठम्" इति इन्द्रियैः सह षष्ठसङ्ख्यापूरणात् मनः अपि इन्द्रियमिति वदन्ति। "इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः"[50], "एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च"[51] इत्यादिश्रुतिषु इन्द्रिव्यतिरेकेण मनसः ग्रहणे कृते अपि अन्तःकरणस्य इन्द्रियत्वं न विहन्यते। अन्तःकरणस्य इन्द्रियेभ्यः परत्वेन पृथुगुपदेशः तस्य इन्द्रियाध्यक्षत्वात्, त्रैकालिकविषयत्वाच्च इति ज्ञेयम्। किञ्च "हस्तादयस्तु स्थितेऽतो नैवम्"[52] इति सूत्रभाष्ये च एकादशेन्द्रियाणि इति अन्तःकरणस्य अपि इन्द्रियेषु अन्तर्भावः कृतः। अपि च "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्"[53] इति सूत्रे अपि मुख्यप्राणं विहाय प्राणशब्देन उक्तानां श्रोत्रादन्तःकरणपर्यन्तानां सर्वेषाम् इन्द्रियत्वं साधितम्।

**वेदान्तपरिभाषायां** "न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। मनःषष्ठानीन्द्रियाणि इति भगवद्गीतावचनं प्रमाणमिति चेत् न। अनिन्द्रियेणापि मनसा षट्त्वसङ्ख्यापूरणाविरोधात्। न हि इन्द्रियगतसङ्ख्यापूरणमिन्द्रियेणैवेति नियमः"[54] इति अन्तःकरणस्य इन्द्रियत्वं निराकृतमिव दृश्यते। तत्र "यजमानपञ्चमाः इडां भक्षयन्ति" इति वाक्ये ऋत्विग्गतपञ्चसङ्ख्यापूरणं ऋत्विग्भिन्नेनापि यजमानेन कृतम्। एवमत्रापि ज्ञेयम्"[55] इति उदाहरणं च प्रदर्शयन्ति। तत्कथं पुनः वेदान्तमते अन्तःकरणस्य इन्द्रियत्वनिर्णयः इति शङ्का न करणीया। तत्र नैयायिकाभिमत-इन्द्रियत्वमात्रं धर्मराजाध्वरीन्द्रैः प्रत्याख्यायते इति न विरोधः। नैयायिकाश्च "शब्देतरोद्भूतविशेषगुण-अनाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्" इति इन्द्रियलक्षणं वदन्ति।

---

44. शाङ्र्गधर.1/5/67
45. सुश्रुत.शारीर.1/15
46. सुश्रुत.शरीर.1/18
47. भ.गी.10/12
48. भ.गी.25/7
49. भ.गी.25/9
50. कठ.उ.1/3/10
51. मुं.उ.2/1/3
52. सू.भा.2/4/6
53. ब्र.सू.2/4/17
54. वे.परि.प्रत्यक्ष.पृ 32
55. वे.परि.प्रत्यक्ष. पृ 32

उद्भूतविशेषगुणः इत्यस्य प्रत्यक्षयोग्यः गुणः इत्यर्थः। शब्दं विहाय यस्मिन् अयं गुणः नास्ति, यस्य च संयोगः ज्ञानं प्रति कारणं तदिन्द्रियम्। कर्णशष्कुल्यवच्छिन्नमाकाशः एव श्रुतम्। आकाशस्य च गुणः शब्दः, स च उद्भूतः प्रत्यक्षः। अतः यदि केवलम् उद्भूतविशेषगुण–अनाश्रयत्वमात्रं दलमिन्द्रियलक्षणे योजितं स्यात् तर्हि श्रोत्रे शब्दगुणस्य उद्भूतत्वेन इन्द्रियत्वं न स्यात्। श्रोत्रेन्द्रिये अव्याप्तिवारणाय शब्देतरमिति दलं योजितम्। नैयायिकाः आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियमर्थेन, ततः विषयस्य प्रत्यक्षज्ञानं भवति इति वदन्ति। एवं श्रोत्रादीनां शब्देतर–उद्भूतविशेषगुण–अनाश्रयत्वे सति ज्ञानकरणसंयोगाश्रयत्वात् इन्द्रियत्वमिति नैयायिकाः। किन्तु नैयायिकप्रतिपादिते इन्द्रियलक्षणे स्वीकृते मनसः धर्माः सुखदुःखादयः न प्रत्यक्षाः भवेयुः। यतः सुखदुःखादीनां मनोधर्माणाम्[56] उद्भूतत्वं (प्रत्यक्षत्वं) अनुभवसिद्धम्। अतः यदि नैयायिकाभिमतम् इन्द्रियलक्षणमङ्गीकृते, तर्हि अनुभवेन प्रत्यक्षाः अपि सुखदुःखादयः अप्रत्यक्षाः स्युरिति धर्मराजाध्वरीन्द्रैः नैयायिकप्रतिपादितम् इन्द्रियत्वमन्तःकरणस्य निराक्रियते इति अवगन्तव्यम्।

साङ्ख्ययोगशास्त्रयोरपि मनोमात्रस्य इन्द्रित्वम् अभ्युपगम्यते।उक्तञ्च साङ्ख्यकारिकायाम्- "उभयात्मकं मनः सङ्कल्पकम् इन्द्रियञ्च साधर्म्यात्"[57] इति। मनसः इन्द्रियत्वं साधर्म्यात् अभ्युपगम्यते। साधर्म्यं च समानधर्मभावः। समानधर्मः च बुद्धीन्द्रियैः कर्मेन्द्रियैः सह मनसः अपि उत्पत्तिदर्शनम्। तथापि बुद्धितत्त्वस्य अहङ्कारतत्त्वस्य च इन्द्रियत्वं न तैः अङ्गीक्रियते, तयोः पृथक्तत्त्वाङ्गीकारात्। किन्तु भामत्यां निरूपितरीत्या "देहाधिष्ठानत्वे सति रूपाद्यालोचनकरणत्वम्"[58] इन्द्रियत्वमिति लक्षणानुसारं मनसः बुद्धेश्च देहाधिष्ठानवत्वे सति रूपाद्यालोचना योगमतानुसारमपि सिध्यति इति इन्द्रियत्वं दुर्वारम्। अभिमानत्मके अहङ्कारे सत्येव रूपाद्यलोचनं सम्भवति इति तस्यापि इन्द्रियत्वं सिद्धमेव। योगसूत्रेषु एव चित्तस्य प्रत्यक्षादिप्रमाणैः रूपाद्यालोचनकार्यं प्रतिपादितम्। उक्तञ्च – "प्रमाण–विपर्यय–विकल्प–निद्रा–स्मृतयः"[59] इति। अपि च पूर्वं प्रतिपादितरीत्या मनोव्यतिरेकेण महत्तत्त्वस्य अहङ्कारतत्त्वस्य च वेदे लोके च अनुपलम्भात् मनो–बुद्धि–अहङ्कार–चित्तरूपम् अन्तःकरणमिन्द्रियम् इति निश्चितम्।

अयुर्वेदेऽपि अन्तःकरणस्य इन्द्रियत्वमुक्तम्। सुश्रुतः – "तत्र वैकारिकाहङ्कारात् तैजससहायात् तल्लक्षणान्येकादशेन्द्रियाणि उत्पद्यन्ते। तद्यथा श्रोत्र–त्वक्–चक्षुर्–जिह्वा–घ्राण–वाक्–हस्त–उपस्थ–पायु–पाद–मनांसि इति। तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि पञ्च कर्मेन्द्रियाणि उभयात्मकं मनः"[60] इति साङ्ख्यमतमनुवदति। चरके –

**"इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।**

**कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा॥**

**जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।",**

**"बुद्धीन्द्रियमनोऽर्थानां विद्याद्यगोचरं परम्।"[61]**

इति बुद्धेः मनसः इन्द्रियाणां च पृथगुपदेशः दृश्यते। तत्र तु इन्द्रियेभ्यः विषग्रहणानन्तरं मनसः गुणदोषविमर्शः, ततः बुद्धेः "इदमेवम्" इति निश्चयः इत्येवं कार्यवाशात् पृथुगपदेशः इति अवगन्तव्यम्। तस्य इन्द्रियत्वे अपि कुत्रचित् अन्येभ्यः इन्द्रियेभ्यः दुरवबोधात् मनः अतीन्द्रियमित्यपि उच्यते।उक्तञ्च – "अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकम्"[62] इति।

### अन्तःकरणस्य मनो-बुद्धि-अहङ्कार-चित्तभेदाः

---

56. कामः सङ्कल्पो विचिकित्सा...सर्वं मन एव" – बृ.उ.1/5/3

57. साङ्ख्य.का.27

58. भामती (सू.भा.) 2/3/17

59. यो.सू.1/6

60. सुश्रुत.शारीर.1/5

61. चरक.शारीर.1/22,23,35

62. चरक.सूत्र.8/4

वेदान्तमते एकमेवान्तःकरणम्। किन्तु तस्य कार्यानुसारम् अनेके भेदाः भवन्ति। उक्तञ्च – “सर्वार्थविषयं त्रैकाल्यवृत्ति मनस्त्वेकमनेकवृत्तिकम्”[63] इति। अपि च – “एकमपि च अन्तःकरणम् अनेकक्रियाकारि भविष्यति, यथा प्रदीपः एकः रूपप्रकाश–वर्तिविकारस्नेहशोषणहेतुः”[64] इति भामती। अन्तःकरणस्य एताः क्रियाः वृत्तिपदेन परिणामपदेनापि व्यपदिश्यन्ते। उक्तञ्च – “तदेव वृत्तिभेदात् क्वचित् भिन्नवद्यपदिश्यते”[65], “सङ्कल्पादि–क्रियाव्यवस्थया अन्तःकरण–व्यवस्थानुमानम्”[66] इति। आयुर्वेदेऽपि एकमेव मनः विचारादिकार्यभेदेन सत्त्वरजस्तमोगुणभेदेन च अनेकमिति प्रतिभासते इति प्रतिपादितम्। यद्यपि एकमेवान्तःकरणम् अणुपरिमाणमेककाले अनेकविषयग्रहणाय समर्थं न भवति, तथापि तैजसत्त्वात् वेगेन प्रत्येकं विषयं गृह्णातीति कारणात् एकस्मिन्नेव काले अनेकवृत्तिकमवभासते इति आयुर्वेदिनः प्रतिपादयन्ति। उक्तञ्च – “स्वार्थेन्द्रियार्थसङ्कल्पव्यभिचरणाच्च अनेकमकस्मिन् पुरुषे सत्त्वं, रजस्तोमोसत्त्वगुणयोगाच्च, न च अनेकत्वम्”[67], “अणुत्वमथ एकत्वं द्वौ गुणौ मनसः स्मृतौ”[68] इति।

एवमन्तःकरणस्य कार्यभेदात् प्राधान्येन मनः, बुद्धिः, अहङ्कारः, चित्तम् इति चत्वारः भेदाः अद्वैतमते प्रतिपाद्यन्ते। उक्तञ्च – "एतेभ्यः पुनराकाशादिगतसात्विकांशेभ्यः मिलितेभ्यः मनोबुद्ध्यहङ्कारचित्तानि जायन्ते",

**“मनोबुद्धिरहङ्कारः चित्तं करणमान्तरं।**

**संशयो निश्चयो गर्वः स्मरणं विषया अमी।। ”**[69],

**"तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तद्विधा।**

**मनो विमर्शरूपं स्यात्बुद्धिः स्यान्निश्चयात्मिका।। ”**[70] इति।

क्वचित् चित्ताहङ्कारयोः बुद्धिमनसी एव अन्तर्भावः कृतः[71]। अतः कुत्रचित् अन्तःकरणस्य मनोबुद्धिभेदाः केवलं उक्ताः। यथा –

**"इन्द्रियाणि मनो बुद्धिः अस्याधिष्ठानमुच्यते।",**

**"इन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिः।।"**[72] इत्यादिषु।

सम्प्रति सर्वेषां मन–आदीनां भेदानां विविरणं संक्षेपेण क्रियते।

***मनः*** – सङ्कल्पवृत्तिकं संशयवृत्तिकं च अन्तःकरणं मनः उच्यते। अत्र सङ्कल्पो नाम भावनाः विचाराश्च। संशयः इदमेवं वा न वा उभयकोटिकं ज्ञनम्। उक्तञ्च – "मनः सङ्कल्पविकल्पालक्षणम्"[73], "मनो नाम सङ्कल्पविक्ल्पात्मिका अन्तःकरणवृत्तिः”[74] इति।

---

63. सू.भा.2/4/6
64. भामती (सू.भा.) 2/4/6
65. सू.भा.2/4/6
66. भामती (सू.भा.) 2/4/6
67. चरक.सूत्र.8/4
68. चरक.शारीर.1/19
69. वे.परि.प्रत्यक्ष.पृ 74
70. पं.दशी.1/20
71. "अनयोरेव चित्ताहङ्कारयोः अन्तर्भावः” – वेदान्तसारः 67
72. भ.गी.3/40,42
73. भ.गी.3/42
74. वेदान्तसारः 66

योगशास्त्रविद: अपि मन: सङ्कल्पविकल्पात्मकमेव वदन्ति। उक्तञ्च – “उभयात्मकं मन: सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्”[75]। आयुर्वेदविद्भिरपि मनस: एवमेव लक्षणमुक्तम्। मनस: कर्माणि निरूपयन् “ऊहो विचारश्च तत: परं बुद्धि: प्रवर्तते”[76] इति विचारस्य मनस: कर्मत्वमुक्तम्। विचारश्च हेयोपादेयतया विकल्पनम्[77]। मन:पुरस्सराणि इन्द्रियाणि यदा अर्थान् गृह्णन्ति, तदूर्ध्वं मन: गृहीतमर्थं गुणयुक्तं इदमादेयं, दोषयुक्तमिदं हेयम् इति कल्पयति। उक्तञ्च – “कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा”[78] इति। तस्मात् सङ्कल्पविकल्पात्मकमेवं मन: अयुर्वेदशास्त्रे अङ्गीक्रियते इति स्थितम्।

***बुद्धि:*** – निश्चयवृत्तिकमन्त:करणं बुद्धि:। मनोरूपिणा अन्त:करणेन “इदं एवं वा न वा” इति संशये प्रदर्शिते, इदमेवमेव इति बुद्धिरूपमन्त:करणं निश्चिनोति। तत: परमेव पुरुष: किमपि कर्तुं प्रवर्तते। उक्तञ्च – "बुद्धिर्नाम निश्चयात्मिकान्त:करणवृत्ति:"[79], "व्यवसायात्मिका बुद्धि:", "बुद्धि: निश्चायात्मिका"[80] इत्यादिषु।

योगमते बुद्धि: महत्तत्वं लिङ्गमिति व्यपदिश्यते[81]। तस्याश्च वेदान्तप्रतिपादितरीत्या निश्चयलक्षणमेव योगिभिरपि अङ्गीक्रियते। उक्तञ्च – “तद्धि निर्विकल्पकाध्यवसायात्मकं प्रधानस्य आध्यं कार्यम्”[82] इति। साङ्ख्यकारिकायामपि –

**“अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्।**
**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्ययम्।। ”**[83]

इति बुद्धे: अध्यवसायात्मकत्वं प्रतिपादितम्। मनोऽधिष्ठितानि इन्द्रियाणि, मन: च घटपटादि–बाह्यवस्तूनि सुखादि–आन्तरविषयान् च प्रकाश्य बुद्धिविषयान् कुर्वन्ति। उक्तञ्च – “कृत्स्नं पुरुषस्य अर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति”[84] इति। आयुर्वेदशास्त्रे चिकित्सका: अपि अध्यवसायलक्षणमेव बुद्धिं वर्णयन्ति। उक्तञ्च –

**“जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।**
**व्यवस्यति तया वक्तुं कर्तुं वा बुद्धिपूर्वकम्।। ”**[85] इति।

मनसा हेयोपादेयतया कल्पिते विषये बुद्धि: स्थिरस्वरूपा हेयम् उत उपादेयमिति इति निर्णयति।

***चित्तम्*** – स्मरणवृत्तिकम् अन्त:करणं चित्तमुच्यते। उक्तञ्च – “अनुसन्धानात्मिका अन्त:करणवृत्ति: चित्तम्”[86] इति। अद्वैतमत–निरूपित–चित्तवृत्ते: स्मरणात्मकस्य अपि अन्त:करणवृत्तिविशेषत्वेन स्वीकरणं दृष्टं योगशास्त्रे। उक्तञ्च – “प्रमाण–विपर्यय–विकल्प–निद्रा–स्मृतय:”[87] इति सूत्रे।

---

75. साङ्ख्य.का.27
76. चरक.शारीर.1/10
77. आयुर्वेददीपिका (चरक.शारीर.) 1/10
78. चरक.शारीर.1/22
79. वेदान्तसार: 65
80. भ.गी.2/41,42
81. यो.सू.2/19 , “यत्तत्परमविशेषेभ्यो लिङ्गमात्रं महत्तत्वम्” – व्यासभाष्यम् (यो.सू.) 2/19
82. मणिप्रभा(यो.सू.) 2/19
83. साङ्ख्य.का.23
84. साङ्ख्य.का.36
85. चरक.शारीर.1/23
86. वेदान्तसार: 68, अनुसन्धानं नाम स्मरणमित्यर्थ:
87. यो.सू.1/7

***अहङ्कारः*** – गर्ववृत्तिकमन्तःकरणमहङ्कारः उच्यते। उक्तञ्च – "अभिमानात्मिका अन्तःकरणवृत्तिः अहङ्कारः"[88] इति। योगशास्त्रविदः अपि अहङ्कारः अहमिति अभिमानः इति व्यपदिशन्ति। अत एव व्यासभाष्ये अहङ्कारस्य "अस्मिता" इति पदप्रयोगः कृतः[89]। साङ्ख्यकारिकायां च – "अभिमानो अहङ्कारः"[90] इत्येव व्यपदेशः दृश्यते। आयुर्वेदशास्त्रे अपि अहङ्कारस्य अभिमानात्मकत्वमेव प्रतिपादितम्। उक्तञ्च –"अहङ्कारव्यापारश्च अभिमाननम् इहानुक्तोऽपि बुद्धिव्यापारेण सूचितो ज्ञेयः। बुद्धिर्हि त्यजामेनमुपाददामीति वा अध्यवसायं कुर्वती अहङ्काराभिमते विषये प्रवर्तते; तेन बुद्धिव्यापरेण अहङ्कारव्यापरोऽपि गृह्यते"[91] इति।

एवमन्तःकरणस्य वृत्तिभेदेषु वेदान्तयोगायुर्वेदमतानां साम्यं लक्ष्यते। योगशास्त्रे यदन्तःकरणं चित्तपदेन व्यपदिष्टं तत् बुद्ध्यहङ्कारमनसां समवायवाचीति गम्यते। अतः एव योगसूत्रेषु कुत्रापि बुद्धि–अहङ्कार–मनसां पृथगुपदेशः न दृश्यते। साङ्ख्यकारिकायां च "अन्तःकरणं त्रिविधम्"[92] इति निरूपितम्। तत्रैव गौडपादैः व्याख्यातं च "किञ्च अन्तःकरणमिति–बुध्यहङ्कारमनांसि, त्रिविधं महदादिभेदात्" इति। अपि च – "बुध्यहङ्कारमनोरूपतत्त्वत्रयात्मकस्य अन्तःकरणस्य महत्तत्त्वम् अङ्कुरावस्था"[93] इति सर्वदर्शनसङ्ग्रहव्याख्यायां योगमतं प्रतिपादितम्। किञ्च महदहङ्कारमनसां तत्त्वान्तरत्वं तु प्रागेव निराकृतम्। एवं मनोबुद्ध्यहङ्कारचित्तानि एकस्य एव अन्तःकरणस्य भेदानि, तेषां च क्रमात् सङ्कल्प–विकल्प–अध्यवसाय–अभिमान–स्मरणानि धर्माः इति अद्वैतमतमेव साधु।

**सङ्केताक्षरसूची** –

| | |
|---|---|
| ईश.उ. | ईशावास्योपनिषत् |
| केन.उ. | केनोपनिषत् |
| कठ.उ. | कठोपनिषत् |
| मुं.उ. | मुण्डकोपनिषत् |
| मां.उ. | माण्डुक्योपनिषत् |
| प्र.उ. | प्रश्नोपनिषत् |
| तै.उ.शिक्षा. | तैत्तिरियोपनिषत् शिक्षावल्ली |
| तै.उ.ब्रह्म. | तैत्तिरियोपनिषत् ब्रह्मवल्ली |
| तै.उ.भृगु. | तैत्तिरियोपनिषत् भृगुवल्ली |
| ऐ.उ. | ऐतरेयोपनिषत् |
| बृ.उ. | बृहदारण्यकोपनिषत् |
| छां.उ. | छान्दोग्योपनिषत् |
| कौ.उ. | कौषीतकी उपनिषत् |

---

88. वेदान्तसारः (अभिमानम् अहमाकारकं ज्ञानम्)

89. "षष्ठश्चाविशेषोऽस्मितामात्रः"– व्यासभाष्यम् (यो.सू.) 2/19

90. साङ्ख्य.का.23

91. आयुर्वेददीपिका (चरक.शारीर.1/23)

92. साङ्ख्य.का.33

93. महामहोपाध्याय वासुदेवशास्त्रि अभ्यङ्करैः विरचिता व्याख्या, सर्वदर्शनसङ्ग्रहः , पृ 313

| | |
|---|---|
| श्वेत.उ. | श्वेताश्वतरोपनिषत् |
| भा. | शाङ्करभाष्यम् |
| ब्र.सू. | ब्रह्मसूत्रम् |
| सू.भा. | ब्रह्मसूत्र-शाङ्करभाष्यम् |
| भ.गी. | भगवद्गीता |
| गी.भा. | भगवद्गीता शाङ्करभाष्यम् |
| वे.परि. | वेदान्तपरिभाषा |
| सर्ववेदान्त. | सर्ववेदान्तसिद्धान्तसारसङ्ग्रह: |
| पं.दशी. | पञ्चदशी |
| शास्त्रसिद्धान्त. | शास्त्रसिद्धान्तलेशसङ्ग्रह: |
| विवेक.चू. | विवेकचूडामणि: |
| अ.सिद्धि. | अद्वैतसिद्धि: |
| यो.सू. | योगसूत्रम् |
| चरक. | चरकसंहिता |
| सुश्रुत. | सुश्रुतसंहिता |
| माधव. | माधवनिदानम् |

**अनुशीलितग्रन्थसूची -**


1. श्रीशङ्करभगवत्पादा: (सं - एस्.सुब्रह्मण्यशास्त्री, मणिद्रविड:): *उपनिषद्भ्याष्यम्*/ दक्षिणामूर्ति मठ प्रकाशन, वारणासी / 2004.
2. श्रीशङ्करभगवत्पादा: (सं - आचार्य जगदीशशास्त्री) : *ब्रह्मसूत्र-शाङ्करभाष्यम् (भाष्यरत्नप्रभया भामत्या न्यायनिर्णयेन च समुपेतम्)*/ मोतिलाल बनारसीदास,वारणासी/ 2005.
3. श्रीशङ्करभगवत्पादा: (सं - वासुदेवशर्मा) : *श्रीमद्भगवद्गीताभाष्यम् (अष्टटीकोपेतम्)*/ चौखम्बा संस्कृत प्रतिष्ठान, वारणासी/ 2016
4. विद्यारण्य: - सं)वासुदेवशर्मा) : *पञ्चदशी*/ चौखम्बा संस्कृत सीरीज आफिस, वारणासी/ 2009.
5. अप्पयदीक्षत: (सं - एस्.आर्.कृष्णमूर्तिशास्त्री, डा.एन्.वीळीनाथन्) : *शास्त्र-सिद्धान्त-लेश-सङ्ग्रह: (कृष्णालङ्कारव्याख्यया सहित:)*/ श्रीमत्-अप्पय्यदीक्षितेन्द्र-ग्रन्थावलि-प्रकाशन-समिति:, वारणासी/ 2008.
6. धर्मराजाध्वरीन्द्र: (सं - प्रो.पारसनाथ द्विवेदी) : *वेदान्तपरिभाषा*/ सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय:, वारणासी/ 2000.
7. पतञ्जलि: (सं - दुण्ढिराजशास्त्री) : *योगसूत्रम् (षट्टीकोपेतम्)*/ चौखम्भा संस्कृत संस्थान, वारणासी/ 2016.
8. पतञ्जलि: (सं - स्वामी श्रीब्रह्मलीनमुनि:) : *पातञ्जलयोगदर्शनम् (योगभाष्य-विवृत्तिव्याख्योपेतम्)*/ चौखम्बा प्रकाशन, वारणासी/ 2017.
9. पतञ्जलि: (सं - श्रीरामशङ्करभट्टाचार्य:) : *पातञ्जलयोगदर्शनम् (तत्त्ववैशारदी-व्यासभाष्यसमेतम्)*/ भारतीय विद्या प्रकाशन, वारणासी/ 1963.

**10**. वाचस्पतिमिश्रः (सं - न्यायाचार्यः श्रीरामशास्त्रीभण्डारी) : *साङ्ख्यतत्त्वकौमुदी*/ चौखम्भा संस्कृत संस्थान, वारणासी/ 1921.

**11**. सुश्रुतः (सं - डा. अम्बिकादत्त शास्त्री) : *सुश्रुतसंहिता (आयुर्वेदतत्त्वसन्दीपिका-सहिता)*/ चौखम्भा संस्कृत संस्थान, वारणासी/ 2018.

**12**. शाङ्र्गधरः (सं - विद्यासागर पण्डित परशुराम शास्त्री) : *शार्ङ्धरसंहिता (दीपिका-गूढार्थदीपिकया संवलिता)*/ चौखम्भा सुरभारती प्रकाशन, वारणासी/ 2018.

**13**. स्वात्मारामयोगीन्द्रः : *हठयोगप्रदीपिका (ज्योत्स्ना-भाषाटीकोपेता)*/ क्षेमराज-श्रीकृष्णदासश्रेष्ठी/ 2009.

**14**. अचार्यः दत्तात्रेयः : *दत्तात्रेय-योगशास्त्रम्*/ archive.org.

**15**. माधवकरः (सं - यदुनन्दनोपाध्याय) : *माधवनिदानम् (मधुकोश-विद्योतिनी व्याख्यासहितम्)*/ चौखम्बा संस्कृत सीरीज आफिस्, वारणासी/ 2018.

**16**. वृद्धजीविकाचार्यः : *काश्यपसंहिता (विद्योतिनीव्याख्यासहिता)*/ चौखम्बा संस्कृत सीरीज, वारणासी/ 2010.